रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 6

**028**

**228 (HXG)**

**2018**

# संस्कृतम्

(केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ]

[ पूर्णांक : 100

निर्देश : (i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।

(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड – 'क' (अपठितांश--अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत--

संस्कृतभाषा राष्ट्रस्य ऐक्यं साधयति। दिव्या गीर्वाणवाणी सर्वभाषासु रम्या, मधुरा च अस्ति। संस्कृतस्य सूक्तयः अस्माकं जीवनस्य दिशाम् निर्धारयन्ति। जीवनस्य सर्वेषु संस्कारेषु संस्कृतस्य प्रयोगः भवति। संस्कृतस्य गौरवं प्रति कस्यापि हृदये कोऽपि संशयः न अस्ति। सर्वे संस्कृतिबोधका ग्रन्थाः मूलरूपेण संस्कृतभाषायाम् एव लिखिता सन्ति। अतएव उच्यते–"संस्कृतिः संस्कृताश्रिता।"

(क) एक पदेन उत्तरं लिखत– 1×2 = 2

(i) संस्कृताश्रिता का अस्ति ?

(ii) संस्कृत–सूक्तयः कस्य दिशां निर्धारयन्ति ?

(ख) पूर्ण वाक्येन उत्तरत– 1

(i) जीवनस्य केषु क्षेत्रेषु संस्कृतस्य प्रयोगः भवति।

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'सर्वभाषासु' इति पदे का विभक्तिः ?

(ii) 'निश्चयः' इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम्।

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत--

जीवने धनस्य अत्यधिक महत्वम् अस्ति। धनेन जीवननिर्वाहः भवति। धनं विना वयं कथं भोजनम् अपि प्राप्तुं शक्नुमः ? परन्तु यदि लोभेन वयं अन्धाः भूत्वा अधिकाधिकं धनं प्राप्तुम् इच्छामः, अनुचितसाधनानां प्रयोगं कुर्मः, तर्हि तेन धनेन दुःखमेव भविष्यति। तस्य रक्षणे एव समयः व्यतीतः भवति। कोऽपि तद् हरिष्यति इति चिन्ता प्रतिक्षणं वर्धते। अभिमानं विवेकं नाशयति। कृष्णधनस्य प्रच्छादनाय महान् क्लेशः भवति। अतः वयम् उचितसाधनैः एव धनार्जनं कुर्याम, कस्मै अपि ईर्ष्यां न कुर्याम अपितु यथाशक्ति ये असहायाः सन्ति तेषां साहाय्यं कुर्याम। त्यागेन एव धनस्य संरक्षणं भवति। त्यागेन एव उपभोगेन च वयम आनन्दं प्राप्तुं शक्नुमः। अन्यस्य धनं प्रति कदापि अस्माभिः लोभः नैव कर्त्तव्यः।





Downloaded from cclchapter.com

(क) एक पदेन प्रश्नानां उत्तराणि लिखत– 1×2 = 2

(i) अभिमानः कं नाशयति ?

(ii) धनस्य संरक्षणं केन एव भवति ?

(ख) पूर्णवाक्येन उत्तरत– 2×2 = 4

(i) प्रतिक्षणं का वर्धते ?

(ii) जीवने कस्य अत्यधिकं महत्त्वं वर्तते ?

(ग) यथानिर्देशम् उत्तरत– 1×2 = 2

(i) 'कुर्याम' इति क्रियापदस्य कर्ता कः ?

(ii) 'अधिकाधिकम्' इति कस्य पदस्य विशेषणम् ?

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

## खण्ड – 'ख' ( रचनात्मकं लेखनम् )

3. रुग्णावकाशार्थं प्रधानाचार्यं प्रति पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां लिखत– 1×5 = 5

(i) ....... ...........

प्रधानाचार्य महाभागः

इण्टर कालेज गोरंगदेशः

महोदयः

विनम्रं निवेदनमस्ति यत् (ii) ............... अहं सहसा (iii) ................ अस्मि। विद्यालयम् (iv) ............... असमर्थः अस्मि। अतः (v) ............... अवकाशं स्वीकृत्य अनुगृह्णातु भवान्।

भवतां शिष्यः

अविवेकः

दशम कक्षीयः

| |
|---|
| **मञ्जूषा** – उपस्थातुम्, ज्वरार्तः, सेवायाम्, विगतरात्रितः, एकादशतारिकायाः |

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत– 1×5 = 5

लताः – सुखदा ! वयं (i) .................. पठामः। संस्कृतस्य किम् महत्त्वम् ?

सुखदाः – लते ! अस्माकं (ii) .................. संस्कृताश्रिता।

लताः – आमः (iii) .................. एव वयम् अस्माकं संस्कृतिं जानीमः।

सुखदाः – अपि च ! संस्कृतभाषा मधुरतमा (iv) .................. अस्ति।

लताः – संस्कृतभाषायां (v) .................. मधुरा सूक्तयः सन्ति।

| |
|---|
| **मञ्जूषा** – संस्कृतम्, बहवः, संस्कृतेन, संस्कृतिः, सरला च |

5. 'अनुशासनम्' इति विषयम् अधिकृत्य पञ्चवाक्येषु एकम् अनुच्छेदं लिखत। सहायतार्थम् अद्यः मञ्जूषा दत्ता– 2×5 = 10

| |
|---|
| **मञ्जूषा** – छात्र वर्गस्य, दुःख पूर्ण, सर्वस्मिन् वर्तते, मानवजीवने, अनुशासनस्य, आज्ञापालनम्, महती |



Downloaded from cclchapter.com

## खण्ड – 'ग' ( अनुप्रयुक्त व्याकरणम् )

6. अधोलिखितेषु रखांकित पदेषु सन्धिं / सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) भारत + इन्दुः एकः कविः आसीत्।

(ख) महा + ऋषि वाल्मीकिः आदिकविः मन्यते।

(ग) भाग्योदयः कदा भवति।

7. रेखांकित पदेषु समासं / समास विग्रहं कृत्वा लिखत– 1×4 = 4

(क) राजा यथाशक्तिः दानं ददाति।

(ख) नीलकण्ठः हिमालये वसति।

(ग) बालकः अष्टाध्यायी स्मरति।

(घ) राज्ञः पुरुष तत्र तिष्ठति।

8. रेखांकितपदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत– 1×5 = 5

(क) गायक + टाप् गीतं गायति।

(ख) गम् + शतृ जलं न पिबेत्।

(ग) पर्यावरणस्य महत् + त्व सर्वे जानन्ति।

(घ) छात्रस्य अपराधः क्षम् + तव्यत्।

(ङ) मथुरानगरी दृश् + अनीयर अस्ति।

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत– 1×5 = 5

(क) कुम्भं करोति .................... कुम्भकारः।

(ख) अहम् .................... अगच्छम् ? इति न जानामि।

(ग) .................... अहम् लिखामि तावत् त्वम् पठ।

(घ) असत्यं .................... वद्।

(ङ) त्वया .................... आयातः ?

| मञ्जूषा – | कदा, | कुत, | इति, | मा, | यावत् |
|---|---|---|---|---|---|

10. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत– 1×3 = 3

(क) सः ग्रामं गच्छति।

(ख) तेन पाठः पठ्यते।


(ग) अहं हसामि।



Downloaded from cclchapter.com

11. घटिकां दृष्ट्वा शब्देषु लिखत, अजयः कदा किं करोति– 1×4 = 4

(क) (ख) (ग) (घ)



5:30 बजे    6:00 बजे    प्रातः 8:00 बजे    अपराह्न 3.30 बजे

(क) अजय प्रातः .............. उत्तिष्ठति।

(ख) सः प्रातः .............. व्यायामं करोति।

(ग) सः .............. विद्यालयं गच्छति।

(घ) सः .............. गृहम् आगच्छति।

12. अधोलिखित वाक्ये अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्ति संस्कृतेन कृत्वा पुनः उत्तरपुस्तिकायां लिखत– 1×2 = 2

(क) मम विद्यालये (23) ................ अध्यापकाः सन्ति।

(ख) अस्माकं विद्यालयस्य परीक्षापरिणामः (92) ................ प्रतिशतम् अस्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत– 1×4 = 4

(क) गौः दुग्धं ददाति।

(ख) सः छात्र अस्मि।

(ग) सा बालकः भोजनं खादति।

(घ) अलम् विवादात्।

## खण्ड – 'घ' ( पठित अवबोधनम् )

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत–

अथ राजानं मुनिरुवाच–"मन्ये भवदीयस्य प्रश्नत्रयस्य समाधानमस्य जनस्य परिवर्तितमानसस्य सेवयैव जातम्। मुनिः पुनरपि विशदीकुर्वन्नकथयत् – अयमेव श्रेष्ठः समयः यत्र मानवः परोपकारे कस्मिन्नपि कर्मणि वा व्यापृतः। समक्षं वर्तमानः पुरुष एव श्रेष्ठः कस्यापि सहायतां कामयमानः। सेवैव श्रेष्ठं कर्म येन हृदयपरिवर्तनमपि जायते।" राजा मुनेरुत्तरप्रदानपद्धत्या प्रमुदितः भूत्वा स्वनगरं गतः।

(क) एकपदेन उत्तरत– 1

(i) श्रेष्ठः कर्म किम् ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) श्रेष्ठः समयः कः ?

(ii) श्रेष्ठः पुरुषः कः ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'कर्मणि' अत्र प्रयुक्ता विभक्ति का ?

(ii) 'आगत' अस्य विलोमपदं किम् ?



Downloaded from cclchapter.com

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत
अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ।।

(क) एकपदेन उत्तरत 1

(i) अक्षरं कः नास्ति ?

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) अनौषधं किं नास्ति ?

(ii) कीदृशः योजकः दुर्लभः ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) 'न अनौषधम्' अत्र समासं कुरत।

(ii) 'योजकः' इत्यस्य पदस्य क्रियापदं किम् ?

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–

चन्दनदासः – एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति।
चाणक्यः – पूर्वम् 'अनृतम्' इदानीम् "आसीत्" इति परस्परविरुद्धे वचने।
चन्दनदासः – आर्य! तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षस्य गृहजन इति।
चाणक्यः – अथेदानीं क्व गतः ?
चन्दनदासः – न जानामि।
चाणक्यः – कथं न ज्ञायते नाम ? भो श्रेष्ठिन् ! शिरसि भयम्, अतिदूरं तत्प्रतिकारः।

(क) एकपदेन उत्तरत– 1

(i) तस्मिन् समये अमात्यराक्षसस्य गृहजन कस्य गृहे आसीत्।

(ख) पूर्णवाक्येन उत्तरत– 1×2 = 2

(i) चन्दनदासस्य परस्परविरुद्धे वचने के ?

(ii) चन्दनदासं भयं दर्शयन् चाणक्यः किं कथयति ?

(ग) निर्देशानुसारम् उत्तरत– 1×2 = 2

(i) अथेदानीं क्व गत ? अत्र क्रिया पदं किम् ?

(ii) 'ऋतम्' अस्य पदस्य विलोमपदं नाट्यांशात् चिनुत।

17. अधोलिखित श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना ।। 1×3 = 3

**भावार्थ** : एकेन (i) ............... सरोवरस्य यादृशी (ii) ............... भवति। तादृशी सरोवरं परित तटे निवसता (iii) ............. न भवति।

(ख) संपत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।। 1×3 = 3

**भावार्थ** : महापुरुषाः सुखे (i) ............... च सन्तुलितमनाः भवन्ति। यथा (ii) ............... प्रभाते सायं काले च (iii) ............. भवति।



Downloaded from cclchapter.com

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत–

(क) क्रोधो हि शत्रुः प्रथमो नराणां,
देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः,
स एव वह्निर्दहते शरीरम् ।।

**अन्वयः**– ½×3 = 1½

नराणां (i) ................ प्रथमः शत्रुः देहस्थितः क्रोधः। यथा (ii) ................ स्थितः वह्निः काष्ठम् एव दहते (तथैव शरीरस्थ क्रोधः) (iii) ................ दहते।

(ख) विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

**अन्वयः**– ½×3 = 1½

विचित्रे खलु संसारे (i) .................... निरर्थकं नास्ति। अश्वः चेत् (ii) .................... वीरः, (तर्हि) भारस्य वहने (iii) ................ (वीरः) अस्ति।

19. रेखाङ्कित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत– 1×4 = 4

(क) पुत्रं द्रष्टुं सः प्रस्थितः। (ख) करुणापरो गृही तस्मै आश्रयं प्रायच्छत।
(ग) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः। (घ) न्यायाधीषः बंकिमचन्द्रः आसीत्।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– ½×8 = 4

(i) तत्र राजसिंहः नाम राजपुत्रः वसतिस्म।
(ii) मार्गे गहने कानने सा एकं व्याघ्रं ददर्श।
(iii) अस्ति देउलाख्यो ग्रामः।
(iv) एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
(v) "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ?
(vi) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद –
(vii) पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"
(viii) अयमेकस्तावद्विभज्य भुज्यताम्।

21. संस्कृतेन वाक्यप्रयोगं कुरुत– 1×3 = 3

(क) जलं (ख) सूर्यः (ग) व्यायामः

*********



Downloaded from cclchapter.com